# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (६)

२६.०७.२०१०

# पुनरावर्तनम्

- स्वराणां विभागः,
- सवर्णसंज्ञा,
- वर्णोत्पत्तिस्थानानि,
- आभ्यन्तरप्रयत्नाः,
- पूर्वत्रासिद्धम् ।

# बाह्यप्रयत्नस्तु एकादशधा ।



# आन्तरतम्यपरीक्षा

- तद्+हितम् ['झयो होऽन्यतरस्याम्' इति सूत्रेण हकारस्त्र पूर्वसवर्णः विधीयते]
- पूर्वसवर्णः = पूर्वस्य, अर्थात् दकारस्य सवर्णः
- सवर्णः = तुल्यास्यप्रयत्नं सवर्णम् । समानस्थानकाः समानाभ्यन्तरप्रयत्नकाश्च वर्णाः सवर्णाः।
- दकारेण समानं स्थानं भवति – ऌ, त्, थ्, द्, ध्, न्, ल्, स् इति अष्टवर्णानाम् (ऌतुलसानां दन्ताः)

- एतेषां मध्ये – ऌकारस्य सकारस्य च विवृतः प्रयत्नः (विवृतमूष्मणां स्वराणां च)
- लकारस्य ईषत्स्पृष्टः प्रयत्नः (ईषत्स्पृष्टमन्तःस्थानाम्)
- तवर्गस्य स्पृष्टः प्रयत्नः (स्पृष्टं प्रयतनं स्पर्शानाम् – कादयो मावसानाः स्पर्शाः)
- तस्मात् दकारस्य सवर्णाः – त्, थ्, द्, ध्, न्

- एषु हकारस्य अन्तरतमः (अत्यन्तं सदृशः) एव तस्य स्थाने आदेशो भवितुमर्हति ।
- कः हकारस्य अन्तरतमः?
- हकारस्य बाह्यप्रयत्नाः –
- १. संवारः, नादः, घोषः – तकार-थकारयोः विवार-श्वास-अघोषाः प्रयत्नाः । अतः ते आदेशा न भवन्ति । द्, ध्, न् इति त्रयः शिष्टाः ।
- २. महाप्राणः – त्रिषु वर्णेषु धकार एव महाप्राणः ।
- एवम् हकारस्य अन्तरतमः धकारः । स एव आदेशो भवति ।
- तद् धितम् = तद्धितम् इति रूपम् ।

# ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम् । (वा)

- होतृ + लृकारः = होतॄकारः ।
- ऋकारलृकारयोः सावर्ण्याभावे अत्र ’अकः सवर्णे दीर्घः’ इति सवर्णदीर्घः न स्यात् ।

- अकारः – स्थानं कण्ठः (अ-कु-ह-विसर्जनीयानां कण्ठः),
- प्रयत्नः विवृतः (विवृतम् ऊष्मणां स्वराणां च)
- हकारः – स्थानं कण्ठः (अ-कु-ह-विसर्जनीयानां कण्ठः),
- प्रयत्नः विवृतः (विवृतम् ऊष्मणां स्वराणां च)
- तुल्यास्यप्रयत्नत्वात् अकार-हकारयोः सावर्ण्यं प्राप्नोति ।

- एवमेव इकार-शकारयोः (तालु स्थानम्, विवृतः प्रयत्नः), ऋकार-षकारयोः(मूर्धा स्थानम्, विवृतः प्रयत्नः), , ऌकार-सकारयोः (दन्ताः स्थानम्, विवृतः प्रयत्नः), परस्परं सावर्ण्यं प्राप्नोति ।
- सवर्णसंज्ञायां सत्याम्,
- दधि इव इत्यत्र यथा, तथा दधि शीतलम् इत्यत्रापि सवर्णदीर्घः स्यात् ।
- दधि अत्र, दधि ऋतम्, दधि ऌकारः इत्यादिषु यथा, तथा
- दधि हरति, दधि षष्ठम्, दधि सान्द्रम् इत्यत्रापि यण् स्यात् ।

# १३. नाज्झलौ (१.१.१०)

- पदद्वयम् । न, आ+अच्+हलौ ।
- आकारसहितः अच् आच्, स च हल् च इत्येतौ मिथः सवर्णौ न स्तः ।
- तेन दधि इत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न ।
- स्वराणां व्यञ्जनानां परस्परं सावर्ण्यं न भवतीति सामान्यतः अर्थः ।